श्रीगणेशायनमः॥सुमुखश्चेत्यादिभिर्मंत्रैरात्मानंसकुटुंबा
नांक्षेमस्थैर्यआयुरारोग्यैश्वर्याद्यभिवृध्यर्थंद्वि
पदचतुष्पदादिजंतूनांशांत्यर्थंपुष्ट्यर्थंतुष्ट्यर्थंसमस्त
मंगलावाप्त्यर्थंसर्वोपद्रवशांत्यर्थंश्रीमहाविष्णुप्रमुख
पंचायतनदेवतानांप्रीत्यर्थंआसनविधिसहितंन्यासपू
र्वकंरुद्रैकादशिनीअभिषेकाख्यंकर्मकरिष्ये॥

नंथाचकलशपूजनंशंखपूजनंघंटापूजनंचकरिष्ये॥
अपसर्पंतुयेभूतायेभूताभूमिसंस्थिताः॥येभूता
विघ्नकर्तारस्तेनश्यंतुशिवाज्ञयः॥उत्तरंत्विहभूता
निपृथिव्यंतरवासिनां॥आसदोनमस्कृत्यपूजाक
र्मसमारभे॥॥तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोप
म॥भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि॥ओम् १

पादेनभूमिंत्रिस्ताडयेत्॥समुद्रवसनेदेवी
पर्वतस्तनमंडले॥विष्णुपत्नीनमस्तुभ्यंपादस्पर्शं
क्षमस्वमे॥पृथ्वीतिमंत्रस्य॥मेरुपृ॰कुरुचासनं॥
अनंतासनायनमः॥विमलासनाय॰कूर्मासना
य॰पद्मासना॰योगासना॰आधारशक्तये॰दुष्ट
विद्रावणसिंहासना॰मध्येपरमसुखासनाय

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

भूर्भुवःसुवरोंइत्यासनेउपविश्य॥अंगुष्ठा०स्वाहा॥ऊर्ध्व
केशिविरूपाक्षिमांसरोमनखभोजने॥तिष्ठद्वलिंशि
खाबद्धेचामुंडेत्यपराजिते॥स्वशिरसि॥गुंगुरुभ्यो
नमः॥पंपरात्परगुरु०॥पंपरमेष्ठीगुरु०गंगणपत०
डुंदुर्गायै०क्षंक्षेत्रपालाय०संसरस्वत्यै०अंआत्म
नेन०रंजात्मने०तंनमात्मने०संसत्वात्मने०नमो

रूनंतायनमोरूद्रवेधसे॥नमोवसिष्ठायनमोरूद्रा
क्षेये॥पराशरायाथराजायनमोरूद्रेसत्यवतीसु
ताय॥नमोगुरुभ्योगुरुपादुकाभ्यानमःपरेभ्यः
परपादुकाभ्यः॥आचार्यसिद्धेश्वरपादुकाभ्यानमो
रूद्रलक्ष्मीपतिपादुकाभ्यः॥ॐनमोयुवंभ्योनमआ
शिनेभ्यः॥यजामदेवान्यदिशक्वामाज्यायसः

शीसमाष्टशिदेवाः॥ सर्वभूतनिवारणोयशाडोयशा
शिराजायसदशोयास्त्रराजायहुंफट्स्वाहा॥ उदक
स्पर्शः॥ प्राणायामः॥ अजननेब्रह्मास्तिष्ठतु॥ पा
दयोर्विष्णुस्तिष्ठतु॥ हस्तयोर्हरस्तिष्ठतु॥ बाहवो
रिंद्रस्तिष्ठतु॥ जठरेअग्निस्तिष्ठतु॥ हृदयेशिव
स्तिष्ठतु॥ कंठेवसवस्तिष्ठंतु॥ मुखेसरस्वतीनि

ष्ठतु॥ नासिकयोर्वायुस्तिष्ठतु॥ नयनयोःसूर्याचंद्र
मसौतिष्ठेतां॥ कर्णयोरश्विनौदेवौतिष्ठेतां॥ ललाट
रुद्रास्तिष्ठंतु॥ मूर्ध्न्यादित्यास्तिष्ठंतु॥ शिरसिमहा
देवस्तिष्ठतु॥ शिखायांवामदेवंचामुंडातिष्ठतु॥
पृष्ठेपिनाकीतिष्ठतु॥ पूर्वतःशूलीतिष्ठतु॥ पार्श्व
योःशिवाशंकरौतिष्ठेतां॥ सर्वतोवायुस्तिष्ठतु॥

ततोबहिःसर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठंतु॥
सर्वेष्वंगेषुसर्वादेवतायथायथंस्थानेनिष्ठंतु॥
मारंक्षंतु॥अग्निर्मेवाचिःश्रितःवाग्घृदये॥हृद
यंमयि॥अहममृते॥अमृतंब्रह्मणि॥वायुर्मेप्रा
णेश्रितः॥प्राणोहृदये॥सूर्योमेचक्षुषिश्रितः॥च
क्षुर्हृदये॥चंद्रमामेमनसिश्रितः॥मनोहृदये॥

दिशोमेश्रोत्रेश्रिताः॥श्रोत्रंहृदये॥आपोमेरेतसि
श्रिताः॥रेतोहृदये॥पृथिवीमेशरीरेश्रिता॥शरीरंहृ
दये॥ओषधिवनस्पतयोमेलोमसुश्रिताः॥लोमा
निहृदये॥हृदयं॥इंद्रोमेबलेश्रितः॥बलंहृदये॥
पर्जन्योमेमूर्धिश्रितः॥मूर्धाहृदये॥ईशानोमेम
न्योश्रितः॥मन्युर्हृदये॥आत्मामेआत्मनिश्रितः॥

आत्मा हृदये॥ पुनर्म आत्मा पुनरायुरागात्॥ पुनः प्रा
णः पुनरा कूतमागात्॥ वैश्वानरो रश्मिभिर्वावृधानः॥
अंतस्तिष्ठत्वमृतस्यगोपाः॥ सर्वेष्वंगेषु सर्वदेवतायथा
यथंस्थानानितिष्ठंतु॥ मारंरक्षंतु॥ यजमानारंरक्षंतु॥
शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं॥ गंगाधरं
दशभुजंसर्वाभरणभूषितं॥ नीलग्रीवंराशांकांकं

नागयज्ञोपवीतिनं॥ व्याघ्रचर्मोत्तरीयंचवरेण्यमभ
यप्रदं॥ कमंडलुवक्षसूत्राभ्यामन्वितंशूलपाणिनं॥
ज्वलंतंपिंगलजटाशिखोद्योतकारिणं॥ अमृ
तेनप्लुतंहृष्टमुमादेहार्धधारिणं॥ दिव्यसिंहासना
सीनंदिव्यभोगसमन्वितं॥ दिग्देवतासमायुक्तंसु
रासुरनमस्कृतं॥ नित्यंचशाश्वतंशुद्धंध्रुवमक्षर

मव्ययं॥सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणं॥एवं
ध्यात्वाद्विजःसम्यक्ततोयजनमारभेत्॥आराधि
तोमनुष्यैस्त्वंसिद्धैर्देवासुरादिभिः॥आराधयामि
भक्त्यात्मामांगृहाणमहेश्वर॥आत्मावहंतुहरयः
सचेतसःश्वेतैरश्वैःसहकेतुमद्भिर्वांताजवैर्बलव
द्भिर्मनोजवैरायाहिशीघ्रं॥ममहव्यायशर्वा॥स्वा

मिन्सर्वजगन्नाथयावत्पूजावसानकं॥तावत्त्वंशी
तिभावेनदेवेस्मिन्संनिधोभव॥सन्निधोवरदोभ
व॥यत्पुरुषंहरायनमःआत्मणेशिरसेस्वाहा॥
चंद्रमाःशिखानाभ्याअःकवचासह्माःनेत्रत्र
यसेनःअस्त्राःकलशास्यमुखेविष्णुकंठेरुद्रस
माश्रितः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणा

स्मृताः॥कुक्षौतुसागरास्सर्वेसप्तद्वीपावसुंधरा॥ऋ
ग्वेदोथयजुर्वेदस्सामवेदोह्यथर्वणः॥अंगैश्चसहि
ताःसर्वेकुक्षौतुसमाश्रिताः॥अत्रगायत्रीसावि
त्रिशांतिःपुष्टीकरीतथा॥जायांतुदेवपूजार्थंदुरि
तक्षयकारकाः॥गंगेचयमुनेचैवगोदावरीसर
स्वती॥नर्मदासिंधुकावेरीजलेस्मिन्संनिधिं कुरु॥कलशदेवताभ्योनमः॥गंधपुष्पं॥धेनुमुद्रां प्र
दर्श्य॥शंखादौचंद्रदेवत्यकुक्षौवरुणदेवता॥पृष्ठे
प्रजापतिश्चैवअग्रेगंगासरस्वती॥त्वंपुरासा
गरोत्पन्नविष्णुनाविधृतःकरे॥निर्मितःसर्वदे
वानांपांचजन्यनमोस्तुते॥पांचजन्यायविद्महे
पावमानायधीमहि॥तन्नःशंखश्चोदयात्॥शं

खदेवताभ्योधूपंपुष्पं॥शंखमुद्रांप्रदर्श्य॥आगमा
र्थंतुदेवानांनिगमार्थंतुरक्षसां॥कुरुघंटामहानां
दंतस्मैघंटांप्रपूजये॥घंटदेवताभ्योनमः॥घंटमु
द्रांप्रदर्श्य॥अपवित्रःपवित्रोवासर्वावस्थांगतो
पिवा॥यस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः
सर्वेशुचिः॥पूजाद्रव्याणिसंप्रोक्ष्य॥आत्मानंप्रो

क्ष्य॥अथध्यानं॥शंलाकारंध्यायेनित्यंएकदंतं
शूर्पकर्णंगजवक्त्रंचतुर्भुजं॥पाशांकुशधरंदेवंवे
वंध्यायेत्सिद्धिविनायकं॥ध्येयःसदा॥देवीं
चतुर्भुजांशंखहस्तांचक्रहस्तांगदाहस्तांपद्म
हस्तांवनमालिनीं॥सर्वाभरणभूषितां॥शांङ्ख
धारिणीखड्गधारिणीमुसलधारिणीशक्ति
धारिणीमहिषमर्दिनीसिंहवाहिनीभगवती

दुर्गांचिंतयामि॥५॥ॐसहस्रशी०लं॥श्रीमहावि
ष्णु०मः॥आवाहनं॥पुरुषएवे०श्रीमहा०आसनं॥
एतावान०श्रीमहावि०पाद्यं॥त्रिपादूर्ध्व०श्रीम
वि०अर्घ्यं॥तस्माद्विरा०श्रीमहावि०आचमनीयं॥
यत्पुरुषेण०श्रीमहावि०स्नानं॥स्नानांतरेणआ
चमनीयं॥पंचामृतस्नपयिष्ये॥आप्यायस्वस०

श्रीमहावि०पयस्नानं॥पयस्नानांतरेणशुद्धोदक
स्नानं॥दधिक्राव्णे०श्रीमहावि०दधिस्नानं॥
घृतंमिमिक्षि०मधुवाता०श्रीमहावि०मधुस्ना
नं॥क्षेत्रस्यपतिनाजंतिविश्वेद्वियंहतेत्रिभवं
त्यूमाः॥स्वादोःस्वादीयःस्वादुनासृज्यासमदंतु
मधुमधुनाभियोधि॥श्रीमहावि०शर्करास्ना

१० नं०॥ गंधद्वारां० श्रीमहावि० षष्ठेनगंधोदकस्नानं०॥
नर्यप्रजां० प्रतिष्ठा॥ तंयज्ञंबर्हि० श्रीमहावि० वस्त्रं०
तस्माद्यज्ञा० उपवस्त्रं०॥ वस्त्रोपवस्त्रांतरेणआ
चमनीयं०॥ तस्माद्यज्ञाः सर्वहुतः॥ ऋचः सा०॥
श्रीमहावि० चंदनं०॥ अश्वतास्तुलाः शुभ्रावुं
कुमेनविराजिताः॥ पूजासंरक्षणार्थायईश्व १०

रः प्रतिष्ठयतां॥ श्रीमहा० अक्षतां०॥ तस्माद्यज्ञा०
श्रीमहावि० पुष्पं०॥ अहिरिवभोगैः पर्येतिबाहुं
ज्यायाहेतिंपरिबाधमानः॥ हस्तघ्नोविश्वावयु
नानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः॥
परिमकद्रव्यं०॥ हरिद्राकुंकुमं०॥ यत्पुरुषं० धूपं॥
ब्राह्मणोस्य० श्रीमहा० दीपं०॥ चंद्रमामं० श्री० नै

वेद्यं॰॥नैवेद्यात्पूर्वेआचमनीयं॰॥अमृतो॰प्रा॰अ
पा॰व्या॰उ॰स॰ब्र॰नैवेद्यंनेआचमनीयं॰॥हस्तप्र
क्षालनंमुखप्रक्षालनं॰॥करोद्वर्तनं॰॥पुगीफलं॰श्री॰
तांबूलं॰॥हिरण्यग॰श्री॰दक्षिणा॰॥फलेनफालितं
सर्वंत्रैलोक्यसचराचरं॥तस्मात्फलप्रदानेनस
फलःश्चमनोरथाः॥श्री॰फलं॰॥श्रियेजातःपुन

रीपं॰॥कर्पूरहरीपं॰श्री॰कर्पूरहरीपं॰॥नाभ्याआसी॰
श्री॰प्रदक्षिणा॰॥सप्तास्या॰श्री॰॥नमस्कारं॰॥यु
गेनय॰मंत्रपुष्पं॰॥नमस्करोमि॰॥सज्जनेन॰श्री॰
दूर्वांकुरां॰॥त्रिरंत्रि॰श्री॰बिल्वपत्रं॰॥आवाह
नं॰अन्यथा॰गतंपापं॰मंत्रहीनं॰अपराध॰यत्पूर॰
अनेनकृतपूजनेनयथाशक्तेनश्रीमहाविष्णुप्रसु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

कपंचायतनदेवताःश्रीयतांनमम॥ॐनमस्तुज्ञा॰
बाणसवणचंडीशानंदीभृंगीजयादयः॥सदाशिव
प्रसादेनसर्वेगृह्णंतुशांभव॥विष्वक्सेनोयक्षा॰
रासनकायाःसुस्वादयः॥महाविष्णुप्रसादोयंस
र्वेगृण्हंतुवैष्णव॥माडरः॰विं॰गणेशोगा॰रात्र्याउ॰
शेषमध्ये॰अकाऊम॰प्रातःकाले॰करचरणकृतं॰ १२